# Devakikritam Vishnu Stotram

# દેવકીકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Devakikritam Vishnu Stotram 2

File name : viShNustotraMdevakIkRRitaM2.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 90

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# દેવકીકૃતં વિષ્ણુસ્તોત્રમ્

અબાલો બાલરૂપેણ યેનેશ ત્વમિહાસ્થિતઃ ।
ત્વદ્રૂપં પ્રણિપત્યાહં યદ્બ્રવીમિ નિબોધ તત્ ॥ ૧૮॥

નમસ્તે સર્વભૂતેશ નમસ્તે મધુસૂદન ।
નમસ્તે પુણ્ડરીકાક્ષ નમસ્તેઽસ્તુ જનાર્દન ॥ ૧૯॥

નમસ્તે શાર્ઙ્ગચક્રાસિગદાપરિઘપાણયે ।
ઉપેન્દ્રાયાપ્રમેયાય હૃષીકેશાય વૈ નમઃ ॥ ૨૦॥

નમોઽસ્તુ તેઽણુરૂપાય બૃહદ્રૂપાય વૈ નમઃ ।
અશેષભૂતરૂપાય તથારૂપાય તે નમઃ ॥ ૨૧॥

અનિર્દેશ્યવિશેષાય તુભ્યં સર્વાત્મને નમઃ ।
સર્વેશ્વરાય સર્વાય સર્વભૂતાય તે નમઃ ॥ ૨૨॥

નમોઽસ્તુ તે વાસુદેવ નમોઽસ્તુ કમલેક્ષણ
અશેષભૂતરૂપાય તથાભૂતાય તે નમઃ
નમોઽસ્તુ તેઽશ્વરૂપાય તથારૂપાય તે નમઃ
અનિર્દેશ્યવિશેષાય તુભ્યં સર્વાત્મને નમઃ
નમોઽસ્તુ તે વાસુદેવ નમસ્તે પુષ્કરેક્ષણ ।
નમોઽસ્તુ તે સદાચિન્ત્ય યોગિચિન્ત્ય જગત્પતે ॥ ૨૩॥

વિષ્ણો નમોઽસ્તુ તે કૃષ્ણ નમસ્તે પુરુષોત્તમ ।
નમો નારાયણ હરે નમસ્તેઽસ્તુ સદાચ્યુત ॥ ૨૪॥

નમો નમસ્તે ગોવિન્દ નમસ્તે ગરુડધ્વજ ।
શ્રીશ શ્રીવત્સ યોગીશ શ્રીકાન્તેશ નમોઽસ્તુ તે ॥ ૨૫॥

નીલોત્પલદલશ્યામ દંષ્ટ્રોદ્ધૃતવસુન્ધર ।
હિરણ્યાક્ષરિપો દેવ નમસ્તે યજ્ઞસૂકર ॥ ૨૬॥

નૃસિંહ જય વિશ્વાત્મન્દૈત્યોરઃસ્થલદારક ।
નમો નમસ્તેઽસ્તુ સદા વિક્ષેપધ્વસ્તતારક ॥ ૨૭॥

માયાવામનરૂપાય તુભ્યં દેવ નમો નમઃ ।
ત્રિવિક્રમ નમસ્તુભ્યં ત્રૈલોક્યક્રાન્તિદુર્જય ॥ ૨૮॥

ઋગ્યજુઃસામભૂતાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીતવચસે મહાશ્વશિરસે નમઃ ॥ ૨૯॥

નિઃક્ષત્રિયોર્વીકરણ વિકરાલપરાક્રમ ।
જામદગ્ન્ય નમસ્તુભ્યં કાર્તવીર્યાસુતસ્કર ॥ ૩૦॥

પૌલસ્ત્યકુલનાશાય સાહુમાર્ગવિચારિણે ।
નલસેતુકૃતે તુભ્યં નમો રાઘવરૂપિણે ॥ ૩૧॥

સામ્પ્રતં મત્પ્રસન્નાય સમ્ભૂતાય મમોદરે ।
સ્વમાયાબાલરૂપાય નમઃ કૃષ્ણાય વૈ હરે ॥ ૩૨॥

યાવન્તિ તવ રૂપાણિ યાવત્યશ્ચ વિભૂતયઃ ।
નમામિ કૃષ્ણ સર્વેભ્યસ્તેભ્યસ્તાભ્યશ્ચ સર્વદા ॥ ૩૩॥

સ્વરૂપચેષ્ટિતં યત્તે યદ્દેવત્વે વિચેષ્ટિતમ્ ।
યચ્ચ તિર્યઙ્મનુષ્યત્વે ચેષ્ટિતં તન્નમામ્યહમ્ ॥ ૩૪॥

પરમેશ પરેશેશ તિર્યગીશ નરેશ્વર ।
સર્વેશ્વરેશ્વરેશેશ નમસ્તે પુરુષોત્તમ ॥ ૩૫॥

ઇતિ વિષ્ણુધર્મેષુ નવતિતમોઽધ્યાયાન્તર્ગતં દેવકીકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Devakikritam Vishnu Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*